सुराणामसुराणाञ्च भवतः कामधुक्रयोः ॥
लक्ष्मणस्यार्ज्जुनस्यापि वाणस्य च भृगोस्तथा ।
सुमेरोश्च समुद्राणां वायोश्च वरुणस्य च ॥
सरस्वत्याश्च दुर्गायाः पद्मायाश्च भुवस्तथा ।
सावित्र्याश्चैव गङ्गाया मनसायास्तथैव च ॥
प्राणाधिष्ठातृदेव्याश्च प्रियायाः प्राणतोऽपि च ।
प्राणाधिकाया राधाया अन्येषामपि का कथा ।
हत्वा दर्पञ्च सर्व्वेषां प्रसादञ्च चकार सः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥

दर्पकः, पुं, (दर्पयति हर्षयति मोहयति वेति । दृप हर्षमोहनयोः+णिच्+ण्वुल् ।) कामदेवः । इत्यमरः । १ । १ । २३ ॥

दर्पणं, क्ली, (दर्पयति सन्दीपयतीति । दृप्+णिच्+ल्युः) चक्षुः । इति जटाधरः ॥ (भावे ल्युट् ।) सन्दीपनम् । इति दृपधात्वर्थदर्शनात् ॥

दर्पणः, पुं, क्ली, (दर्पयति सन्दीपयतीति । दृप्+णिच्+"नन्दिग्रहीति ।" ३ । १ । १३४ । इति ल्युः ।) रूपदर्शनाधारः । आर्शि इति भाषा । तत्पर्य्यायः । मुकुरः २ आदर्शः ३ । इत्यमरः । २ । ६ । १४० ॥ आत्मदर्शः ४ नन्दरः ५ दर्शनम् ६ प्रतिबिम्बातम् ७ । इति शब्दरत्नावली ॥ कर्कः ८ कर्करः ९ । इति जटाधरः ॥ (यथा, चाणक्ये । १०६ ।
"यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किम् । लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति ॥")
अस्य गुणः । आयुःश्रीकारित्वम् । पापनाशित्वञ्च । इति राजवल्लभः ॥ पुं, पर्व्वतभेदः । नदविशेषः । यथा,—

और्व्व उवाच ।
"ततः पूर्व्वे महाराज ! दर्पणो नाम पर्व्वतः ।
कुवेरो यत्र वसति धनपालैः समं सदा ।
यस्मिन्नास्ते मध्यभागे रोहिणो रोहिताकृतिः ।
यस्मिंल्लोहादिकं स्पृष्टं स्वर्णतां याति तत्क्षणात् ॥
यन्नातिदूरे स्रवति दर्पणो नाम वै नदः ।
हिमाद्रिप्रभवो नित्यं लौहित्यसदृशः फले ॥
सतनूपन्नं हि लौहित्यं सर्व्वदे वगणैर्हरिः ।
सर्व्वतीर्थोदकैः सम्यक् स्नापयामास तं सुतम् ॥
तस्य स्नानसमुद्भूतः पापदर्पस्य पाटनः ।
तेनायं दर्पणो नाम पुरा देवगणैः कृतः ॥
तस्मिन् स्नात्वा नदवरे योऽर्च्चयेद्दर्पणाचले ।
कुवेरं प्रतिपत्तिथ्यां कार्त्तिके शुक्लपक्षतः ॥
स याति ब्रह्मसदनमिह भूतिशतैर्युतः ॥"
इति कालिकापुराणे ८१ अध्यायः ॥

दर्पारम्भः, पुं, (दर्पस्य आरम्भः) अहङ्कारारम्भः । तत्पर्य्यायः । मटस्फटिः २ । इति जटाधरः ॥

दर्भः, पुं, (दृणाति विदारयतीति । "दृदलिभ्यां भः ।" उणां ३ । १५१ । इति भः ।) कुशः । इत्यमरः ।२।४।१६६ ॥ उलपतृणम् । इति रत्नमाला ॥ काशः । इति शब्दरत्नावली ॥ ॥
("कुशो दर्भस्तथा वर्हिः सूच्यग्रो यज्ञभूषणः ।
ततोऽन्यो दीर्घपत्रः स्यात् क्षुरपत्रस्तथैव च ॥
दर्भद्वयं त्रिदोषघ्नं मधुरन्तुवरं हिमम् ।
मूत्रकृच्छ्राश्मरीतृष्णावस्तिरुक्प्रदरास्रजित् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
"हरिताः सपिञ्जलाश्चैव पुष्टाः स्निग्धाः समाहिताः ।
गोकर्णमात्रास्तु कुशाः सकृच्छिन्नाः समूलकाः ॥
पितृतीर्थेन देयाः स्युर्दूर्व्वाश्यामाकमेव च ।
काशाः कुशा वल्वजाश्च तथान्ये तीक्ष्णरोमशाः ।
मौञ्जाश्च शाद्वलाश्चैव षड्दर्भाः परिकीर्त्तिताः ॥
सपिञ्जलाः सायाः तीक्ष्णरोमशा इति वल्वजानां विशेषणम् । शाद्वला इति सर्व्वेषां विशेषणम् । तेन तेषामभावे शूकतृणशरशीर्य्यवल्वजनलशुण्ठवर्जं सर्व्वतृणानीति गोभिलेन तद्व्यतिरिक्तवल्वजानां निषेधो बोद्धव्यः । शूकानि फलपुष्पमञ्जर्य्यस्तानि येषां तृणानां सन्ति तानि शूकतृणानि इति भट्टनारायणचरणाः ॥ गोकर्णमिता वितृताङ्गुष्ठानामिकापरिमाणाः ।
रत्निप्रमाणाः शस्ता वै पितृतीर्थेन संस्कृताः ।
उपमूले तथा लूनाः प्रस्तरार्थे कुशोत्तमाः ॥
इति वायुपुराणम् ॥ ॥
वर्ज्यप्रतिप्रसवमाह हारीतः ।
पथि दर्भाश्चितौ दर्भा ये दर्भा यज्ञभूमिषु ।
स्तरणासनपिण्डेषु षड्दर्भान् परिवर्ज्जयेत् ॥
पिण्डार्थं ये स्तृता दर्भा यैः कृतं पितृतर्पणम् ।
मूत्रोच्छिष्टप्रलिप्ते च त्यागस्तेषां विधीयते ॥
घृतैः कृते च विण्मूत्रे त्यागस्तेषां विधीयते ।
घृतैरित्युपलक्षणेन तृतीया घृतैर्दर्भैरुपलक्षितेन पुरुषेण ॥
नीवीमध्ये च ये दर्भा ब्रह्मसूत्रे च ये धृताः ।
पवित्रांस्तान् विजानीयाद्यथा कायस्तथा कुशाः ॥
आचम्य प्रयतो नित्यं पवित्रेण द्विजोत्तमः ।
नोच्छिष्टन्तु भवेत्तत्तु भुक्तशेषं विवर्जयेत् ॥
कृतं समापितमित्यर्थः ॥ ॥
दर्भवटुलक्षणमाह रत्नाकरे गृह्यसंग्रहः ।
ऊर्द्धकेशो भवेद्ब्रह्मा लम्बकेशस्तु विष्टरः ।
दक्षिणावर्त्तको ब्रह्मा वामावर्त्तस्तु विष्टरः ॥
शान्तिदीपिकायाम् ।
सप्तभिर्नवभिर्वापि सार्द्धद्वितयवेष्टितम् ।
ओङ्कारेणैव मन्त्रेण द्विजः कुर्य्यात् कुशद्विजम् ॥
नवभिरित्यत्र पञ्चभिरिति कर्म्मोपदेशिन्यां पाठः । दर्भसंख्याविशेषाभिधानं छन्दोगेतरपरम् ।
यज्ञवास्तुनि मुष्ठ्याञ्च स्तम्भे ब्रह्मवटौ तथा ।
दर्भसंख्या न विहिता विष्टरास्तरणेष्वपि ॥
इति गोभिलपरिशिष्टीयवचनात् ।" इति श्राद्धतत्त्वम् ॥

दर्भटं, क्ली, (दृभ्यते निभृतस्थाने विरच्यते इति । दृभ ग्रन्थने+बाहुलकात् अटन् ।) निभृतगृहम् । इति त्रिकाण्डशेषः ॥

दर्भपत्रः, पुं, (दर्भस्य कुशस्येव पत्राणि यस्य ।) काशः । इति राजनिर्घण्टः ॥

दर्भाह्वयः, पुं, (दर्भं आह्वयते स्पर्द्धते सदृशत्वात् ; आ+ह्वे+अच् ।) मुञ्जः । इति राजनिर्घण्टः ॥ (मुञ्जशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

दर्व्वः, पुं, (दृणाति विदारयतीति । दृ+"कृगृशृदृभ्यो वः ।" उणां १।१५५। इति वः ।) राक्षसः । हिंस्रः । इति संक्षिप्तसारे उणादिवृत्तिः ॥ (जातिविशेषः । यथा, महाभारते । २।५१।१३।
"कैरता दरदा दर्व्वाः शूरा वैयामकास्तथा ।
औदुम्बरा दुर्विभागाः पारदाः सह वाह्लिकैः ॥"
स्त्रियां टाप् । उशीनरपत्नीभेदः । यथा, हरिवंशे । ३१ । २२ ।
"उशीनरस्य पत्न्यस्तु पञ्च राजर्षिवंशजाः ।
नृगा कृमी नवा दर्व्वा पञ्चमी च दृषद्वती ॥")

दर्व्वरीकः, पुं, (दृ विदारे+"फर्फरीकादयश्च ।" उणां । ४ । २० । इति ईकन्प्रत्ययेन निपातनात् साधुः ।) इन्द्रः । वायुः । वाद्यभेदः । इति संक्षिप्तसारे उणादिवृत्तिः ॥

दर्व्वाटः, पुं, (दर्व्वाय हिंसायै अटतीति । अट+अच् । शकन्ध्वादित्वात् अलोपः ।) द्वारवारी । इति हारावली । १२८ ॥

दर्व्विः, स्त्री, (दृणाति विदारयत्यनेनेति । दृ+"वृदृभ्यां विन् ।" उणां ४ । ५३ । इति विन् ।) अन्नादिदारकः । हाता इति भाषा । तत्पर्य्यायः । कम्बिः २ खजाका ३ । इत्यमरः । २ । ९ । ३४ ॥ दर्व्वी ४ कम्वी ५ खजाकजः ६ । फणा । इति शब्दरत्नावली ॥

दर्व्विकः, पुं, (दर्व्वि+स्वार्थे कन् । अभिधानात् पुंस्त्वम् ।) दर्व्वी । इति द्विरूपकोषः ॥

दर्व्विका, स्त्री, (दर्व्वि+स्वार्थे कन्+टाप् ।) दार्व्विका । इत्यमरटीकायां रायमुकुटः ॥ खजाका । इति द्विरूपकोषः ॥ कज्जलम् । यथा,
"सौवीरं जाम्बलं तुत्थं मयूरग्रीवकं तथा ।
दर्व्विका मेघनीलञ्च अञ्जनानि भवन्ति षट् ॥"
तल्लक्षणम् यथा, कालिकापुराणे ६८ अध्याये ।
"सवद्रूपन्तु सौवीरं जाम्बलं प्रस्तरं तथा ।
मयूरग्रीवकं रत्नं मेघनीलन्तु तैजसम् ॥
घृष्ट्वा निष्पाद्य चैतानि शिलायां तैजसेऽथवा ।
प्रदद्यात् सर्व्वदेवेभ्यो देवीभ्यश्चापि पुत्रक ! ॥
घृततैलादियोगेन तत्स्थादौ दीपवह्निना ।
यदञ्जनं जायते तु दर्व्विका परिकीर्त्तिता ॥

दर्व्वी, स्त्री, (दर्व्वि+वा ङीष् ।) दर्व्विः । इति शब्दरत्नावली ॥ (यथा, उत्तरगीतायाम् । २ । ३७ ।
"आलोड्य चतुरो वेदान् धर्म्मशास्त्राणि सर्व्वदा ।
योऽहंब्रह्म न जानाति दर्व्वी पाकरसं यथा ॥")

दर्व्वीकरः, पुं, (दर्व्वीं फणां करोतीति कृ+"कृञो हेतुताच्छील्यानुलोम्येषु ।" ३।२।२०। इति टः । यद्वा, दर्व्वी फणा कर इवास्य ।) सर्पः । इत्यमरः । १ । ८ । ८ ॥ (यथा, सुश्रुते कल्पस्थाने चतुर्थाध्याये ।
"दर्व्वीकरा मण्डलिनो राजिमन्तस्तु पन्नगाः ।
तेषु दर्व्वीकरा ज्ञेया विंशतिः षट् च पन्नगाः ॥"